सोम उवाच ।
न स्थानं पूर्ववद्ब्रह्मन् शरीरे मम वर्त्तते ।
न वीर्य्यं वा तथोत्साहो निसीदन्त्यङ्गसन्धयः ॥
नोत्सहे पूर्ववच्चेष्टां विधातुं सुतरामहम् ।
चेष्टाहीनस्त्वनुदिनं वर्त्तयं केन लोकभृत् ॥
ब्रह्मोवाच ।
ग्रस्तस्य यक्ष्मणा सोम यदभूदङ्गसन्धयः ।
पूर्व्वं विशीर्णा भवतस्तत्पूर्णमभवन्न हि ॥
अधुना भवतो देहचूर्णं निःसारितं मया ।
शरीरात् साम्प्रतं ज्योत्स्ना अञ्जसा राज-
यक्ष्मणः ॥
तेषां प्रक्षालनविधौ लवणो यत् स्थितं जले ।
ज्योत्स्नायाश्च सुधायाश्च तेन क्षीणो भवान्
यतः ।
ततोऽङ्गसन्धयो राजंस्तव सीदन्ति साम्प्रतम् ॥
अत्रोपायं विधास्यामि यथा नार्त्तिं लभेद्भवान् ।
प्राजापत्यः पुरोडाशो हवनीयः पुरोऽध्वरे ॥
ऐन्द्रस्ततोऽनु चाग्नेयः प्रदेयः सर्व्वतः क्रतौ ।
ततोऽनु भवतो भागः पुरोडाशो मया कृतः ॥
तेन भागेन भुक्तेन नित्यं यज्ञहुतेन हि ।
पूर्व्ववत्ते समुत्साहः स्थानं वीर्य्यं भविष्यति ॥
यच्चामृतकणास्तोये क्षीरोदस्य स्थितास्तव ।
शरीरचूर्णं यावन्ति ज्योत्स्नायाश्चापि ये कणाः ।
वृद्धिं यास्यन्ति सततं क्षीरसागरमध्यगाः ॥
स्वारोचिषेऽन्तरे प्राप्ते द्वितीये शङ्करांशजः ।
दुर्व्वासा भविता विप्रः प्रचण्डश्चण्डभास्करः ॥
स महेन्द्रस्याविनयात् शापं दत्त्वा सुदारुणम् ।
करिष्यति त्रिभुवनं निःश्रीकं ससुरासुरम् ॥
श्रिया हीने ततो लोके भविता लोकविप्लवः ।
यथा तव क्षयात् सोम प्रवृत्तो लोकविप्लवः ॥
तन्मानुषप्रमाणेन तृतीये तु कृते युगे ।
भविष्यति स्थास्यति च यावद्युगचतुष्टयम् ॥
ततश्चतुर्थे सम्प्राप्ते सह देवैः कृते युगे ।
क्षीरोदं निर्म्मथिष्यामः शम्भुर्विष्णुरहं तथा ॥
मन्थानं मन्दरं कृत्वा सर्पराजं तथांशुकम् ॥
यज्ञभागेषु हीनेषु देवानार्थं वयं ततः ।
मथिष्यामः समं देवैः क्षीरोदं सह दानवैः ।
त्वच्छरीरामृतमिदं यत् स्थितं क्षीरसागरे ॥
तत्प्रमथ्य ग्रहीष्यामो राशीभूतं तथाक्षयम् ।
सर्व्वौषध्यन्तरे कृत्वा त्वच्छरीरं तदा वयम् ।
क्षेप्स्यामः सागरजले शरीरार्थं विधो तव ॥
निर्म्मथ्य सागरं पश्चात् समुद्धार्य्य यदामृतम् ।
तदा तव वपुस्तस्मिन्नपूर्व्वं सम्भविष्यति ॥
ओजो वीर्य्यांशुकं कान्तमक्षयञ्च सुधात्मकम् ।
दृढाङ्गसन्धिकं चारु भविष्यति वपुस्तव ॥
मार्कण्डेय उवाच ।
सुधांशुमेवमाभाष्य ब्रह्मा लोकपितामहः ।
विधोः क्षयाय मासार्द्धं वृद्धये यत्नवानभूत् ॥
यथा दक्षेण गदितं मासार्द्धं यातु चन्द्रमाः ।
क्षयं वृद्धिञ्च मासार्द्धं यत्नं तत्राकरोद्विधिः ॥
यतः षोड़शधा चन्द्रं सुरज्येष्ठो विभक्तवान् ।
विभज्य च सुरान् सर्व्वान् समुवाचेदमद्भुतम् ॥
कलाः षोड़श चन्द्रस्य तत्रैका शम्भुमूर्द्धनि ।
तिष्ठत्वक्षावधि पराः क्षयं यान्तु क्षयं विना ॥
क्षयेण यदि रोगेण मासार्द्धं दक्षवाक्यतः ।
क्षयाय पीड्यते चन्द्रो नोपशान्तिः सदा भवेत् ॥
किन्त्वस्य या कला शम्भौ ज्योत्स्ना गच्छन्तु तां
प्रति ।
चतुर्द्दशकलासंस्थाः प्रतिमासं सुरोत्तमाः ॥
चतुर्द्दशकलासंस्थान्यमृतानि पिवन्तु वै ।
प्रतिपत्तिथिमारभ्य भवन्त्वाचतुर्द्दशीम् ॥
तेजोभागाः सूर्य्यविम्बं चतुर्द्दशतिथौ क्रमात् ।
प्रविशन्तु क्षयं त्वेवं कृष्णपक्षे विधोर्भवेत् ॥
यातु शेषा कलादर्शे हरित्पत्रे पलायिता ।
तिष्ठतु प्रथमे भागे तिथौ तस्यां निशापतेः ॥
द्वितीये दर्शभागे तु रोहिण्या यातु मन्दिरम् ।
तृतीये तु सरस्वत्यां स्नात्वा सन्धुक्षितो विधुः ॥
चतुर्थे वत्ससंपूर्णस्तिथिभागे विभावसोः ।
मण्डलं यातु चन्द्रोऽयं सविम्बरथघोटकः ॥
यावत्कालेन हि कला प्रथमा क्षयमाप्नुयात् ।
एवमेवं कृष्णपक्षे तावत्स्या प्रतिपत् भवेत् ॥
द्वितीयादौ कृष्णपक्षे वृद्धिह्रासस्तथाविधः ।
तिथीनां वृद्धिहेतुश्च शुक्ले कृष्णे तथा भवेत् ॥
ततः पुनः शुक्लपक्षे यावत् पूर्व्वा कलोदिता ।
वृद्धिमेति भवेत्तावत् प्रतिपत्तिथिरादितः ॥
ततो द्वितीयभागस्य या ज्योत्स्ना हरमूर्द्धनि ।
स्थितायां वै कलायान्तु गता सा पुनरेष्यति ॥
युष्माभिस्तु भवेत् पेयममृतं यद्दिने दिने ।
तद्द्वितीयादितिथिभिः पूर्णान्ताभिः सदैव हि ॥
स्वयमुत्पत्स्यते चन्द्रो ज्योत्स्नायोगात् सुरो-
त्तमाः ।
यथा दिने दिने भागाः क्षयं यान्ति तथा
विधोः ॥
वृद्धिं गच्छन्त्वनुदिनं शुक्लपक्षेऽन्वहं सुराः ।
तेजोभागः सूर्य्यविम्बात् पुनरेव समेष्यति ॥
प्रयास्यति कृष्णपक्षे यथाभागक्रमन्तथा ।
ज्योत्स्नाहरशिरश्चन्द्रात् प्रत्यहं पुनरेष्यति ॥
तेजोभागः सूर्य्यविम्बादमृतं वत्स्यते स्वयम् ।
एवं वृद्धिः शुक्लपक्षे सुधांशोः संभविष्यति ॥
पक्षयोः शुक्लकृष्णत्वं चन्द्रवृद्धिक्षयाद्भवेत् ।
यावत्कालेन यो भागं क्षयं वृद्धिञ्च यास्यति ॥
तावत्कालमभिव्याप्य तिथिः स्थास्यति सा पुनः ॥
चिरेण वृद्धिर्यदि वा क्षयो वा
द्रुतेन वृद्धिर्यदि वा क्षयो वा ।
द्रुतास्तिथीनां तु सदा क्षयः स्या-
च्चिरात्तु वृद्धिस्थितिषु प्रवेशे ॥
इयं कथञ्च चन्द्रेण विना न संभविष्यति ।
तस्मात् तयोः प्रवृद्ध्यर्थं चन्द्रं रक्षन्तु देवताः ॥
आह्लादनीयः शुभ्रांशुः कलाशेषोऽनुमासतः ।
अमावास्यापराह्णे तु पितृभी रोहिणीगृहे ॥
तस्यैवास्वादनात् कथं वृद्धिं यास्यति चान्वहम् ।
तेन कव्येन पितरस्तृप्तिं यास्यन्ति वै पराम् ॥
श्रीमार्कण्डेय उवाच ।
ततः सुरगणाः सर्व्वे यथोक्तं विधिना तथा ।
चक्रुर्लोकहितार्थाय चन्द्रस्य क्षयवृद्धये ॥
महादेवोऽपि चन्द्रार्द्धं स्वरूपं परमात्मनः ।
जग्राह देवैर्विधिना शिरसाभ्युदितो भृशम् ॥
यत्तेजः परमं नित्यमजमव्ययमक्षयम् ।
तत्स्वरूपाश्चन्द्रकलाः शापतस्तु क्षयं गताः ॥
प्रविशन्ति यदा ज्योतिरानन्दमजरं परम् ।
योगिनान्तु तदा तेषां चित्तं तल्लीनमेष्यति ॥
महादेवशिरःसंस्थे लीने चित्ते सुधानिधौ ।
चन्द्रद्वारा भवेन्मुक्तिरित्येवं वैदिकी श्रुतिः ॥
एतज्ज्ञात्वा महादेवः क्षयवृद्ध्या विना कृतम् ।
हिताय सर्व्वलोकानां जग्राह शिरसा विधुम् ॥
चन्द्रज्योत्स्नासमायोगादोषध्यो यान्ति वृद्धये ।
सर्व्वौषधीषु वृद्धासु प्रवर्त्तन्ते ततोऽध्वराः ॥
अध्वरेषु प्रवृत्तेषु स्वान् स्वान् भागांस्तु देवताः ।
परिगृह्णन्ति पितरस्तथा कव्यानि भूरि च ॥
अमृतं ब्रह्मणा सृष्टं यद्देवेभ्यः पुरातनम् ।
तेन तृप्यन्ति हीना ये हव्यभागेन देवताः ॥
यज्ञेनाप्यायिते तच्च ज्योत्स्नाभिर्वृद्धिमेति वै ।
यज्ञज्योत्स्ना विना भूतं तच्च स्यात् क्षीण-
मन्यथा ॥
अतोऽमृतस्य यज्ञस्य चन्द्रमाः कारणं स्वयम् ।
अतोऽस्य दक्षशापात्तु रक्षार्थे तच्चिकीर्षितम् ॥
अद्यापि कृष्णपक्षेऽपि सुधा संपीयते सुरैः ।
तेजः सूर्य्यं याति शम्भोश्चन्द्रार्द्धं ज्योत्स्निका तथा ।
पुनश्च शुक्लपक्षे तु शेषोदेति कला ततः ।
ज्योत्स्नाद्वितीयो भागस्तु तेजोभागो द्वितीयकः ॥
अन्वेत्युपशिरश्चन्द्रात् सूर्य्यविम्बाद्यथाक्रमम् ।
कलाः षोड़श चन्द्रस्य तत्रैका शम्भुशेखरे ॥
सितासितावुभौ पक्षौ शेषाणामुदयक्षयौ ।
इति वः सर्व्वमाख्यातं विभक्तश्चन्द्रमा यथा ॥
ब्रह्मणा पर्व्वतश्रेष्ठे तथा तच्चन्द्रभागतः ।
यज्ञभागे स्थिते यस्माद्देवार्थमकरोद्विधुम् ।
कथं स्थितेऽपि पित्रर्थं तिथिवृद्धिक्षयौ यथा ॥
इदं पुण्यतमाख्यानं यः शृणोति सन्नरः ।
राजयक्ष्मा तस्य कुले न कदाचिद्भविष्यति ॥
यक्ष्मणा परिभूतो यः शृणोति वचनं विधेः ।
अचिरात् यक्ष्मणा मुक्तः स भवेन्नरसत्तमः ॥
इदं स्वस्त्ययनं पुण्यं गुह्यात् गुह्यतरं परम् ।
यः शृणोत्येकचित्तः सन् स महापुण्यभाग्-
भवेत् ॥”
इति कालिकापुराणे २१ अध्यायः ॥

राजयोग्यः, त्रि, (राज्ञो योग्यः ।) राजार्हः । नृपोचितः । यथा,—
“त्रिकोणकण्टके सौम्ये पापे चोपचयस्थिते ।
राजयोग्या भवेन्नारी सुन्दरी कुलवर्द्धिनी ॥”
इति जातकामृतम् ॥

राजरङ्गं, क्ली, (राजयोग्यं रङ्गम् ।) रजतम् । इति शब्दरत्नावली ॥

राजराजः, पुं, (राज्ञामपि राजा धनाधिपत्वात् । “राजाहःसखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् ।) कुवेरः । इत्यमरः । १ । १ । ६३ ॥ (यथा, किरातार्ज्जुनीये । ५ । ५१ ।